DHARMIKALAKSHNAVARNANAM

R
S
V
L
2264

015,1M0C,1
N
2264

* श्रीः *

श्रीमदार्य्य पण्डित कृष्ण चन्द्र सूरि विरचितं

धार्म्मिक-लक्षण-वर्णनम्


❀ काव्यम् ❀



तत्कृताभ्यां

सुबोधिनीसंस्कृतटीका भावार्थबोधिनी भाषाटीकाभ्यां

समलङ्कृतम्



निजद्रव्यव्ययेन मुद्रापयितश्च

स्वायत्तीकृतोस्य विधिनियमेन सर्वाधिकारः

प्रथमंसंस्करणम्

मूल्यमाणकसप्तकम्

प्रकाशकः—

श्रीमदार्य्य पं० कृष्णचन्द्र सूरिः
बीलिया, जि० चितौरगढ़
(मेवाड़)

015,1M00,1
N

015,1M00,1
N



प्रथमवारं सहस्रद्वयम्

२०००




2264

2264

मुद्रकः—
किशोरीलाल केडिया
वणिक् प्रेस
१, सरकार लेन, कलकत्ता.

TIRUPATI.



पण्डित श्रीकृष्णचन्द्र द्विवेदिभिः
सूरिवर्य्यैः प्रणीतो धार्मिक लक्षण
वर्णनाभिधः सन्दर्भोऽयं धार्मिक
पदमारुरुक्षूणां सोपानायतेतरा-
मिति ।

श्रीचन्द्रिकादत्त मिश्रः

सांगवेद विद्यालय यज्ञशाला,

१२, झामापोखर लेन,

कलकत्ता ।

भूमिका

अयि सभ्यवर्य्याः !

किं न जानन्ति भवन्तो यन्मनुष्याः सत्यसनातनवैदिक विस्तीर्णराजमार्गाद्भ्रष्टाः कण्टकाकीर्णाधार्म्मिकसङ्कीर्णतस्करकदध्वसु विचरन्तो नानाऽऽकृतिधारिणो न केवलं स्वकीय मन्तःकरणं कलुषयन्ति, अपितु मधुरवचनादिभि रनेकविधै रुपायै श्च भवतां विमलकुस्याधारभूतानां कोमलमतीनां बालकानामपि मनांसि मोहयित्वा तांस्तत्राकर्षयितुं भूयो भूयः प्रयतन्तेऽधमाः। नावगन्तुम् शक्नुवन्ति च भवन्तः सरल-प्रकृतय स्तेषांकपटमुनीनां कापट्यम्।


अतस्तेभ्यो धूर्त्तेभ्यः परिरक्षणेच्छया भवद्वंशोद्भवानां धर्म्मावबोधनं परमाश्यकं विचार्य्य तेभ्यः सुबोधिनी संस्कृतटीकया, भावार्थ बोधिनी भाषाटीकया च समलङ्कृतं धार्म्मिक-लक्षणवर्णनं नाम सरलपद्यमयं काव्य मेतन्मया विरचितम्।

काव्येऽत्र धर्म्मस्य धृत्यादीनि दशलक्षणानि प्रदर्शितानि। संस्कृत-टीकायाञ्चान्वयक्रमेण पद्यगतशब्दानांपर्य्यायाः, अध्येतृणां विशेषलाभार्थं यत्रतत्रकोषानां प्रमाणानि सन्निवेशितानि, यमनियमानामपि दिग्दर्शनं दर्शितम्। टीकेयमतीवसुगमा, अतएव बालकानां विशेषोपयोगिनी। संस्कृतानभिज्ञेभ्यो जनेभ्यः प्रचलितराष्ट्रभाषाटीकाया अपि सन्निवेशो विहितः।

नूनं काव्यस्यास्यानुसेवनेन केषामपि कोप्युपकारो भविष्यति तर्हि प्रयत्नस्यास्य साफल्यं मन्स्ये। कदाचित्त्रुट्योऽस्मिन्काव्ये भवतां दृष्टिपथे पथिकायेरँ स्तदा "गच्छतः स्खलन" मिति पठ्यन्ताम् ॥

तत्र भवता मनुचरः—

कृष्णचन्द्रः।



॥ ओ३म् ॥

धार्म्मिक-लक्षण-वर्णनम्

काव्यम्

स्वयंभुवं विश्व-सृजं शुचिं विभुं
विकार-शून्यं जनुषा मगोचरम् ।
प्रणम्य सद्धार्म्मिक-लक्षणान्वितं
विवर्ण्यते काव्य मिदं मनोहरम् ॥१॥

(सुबोधिनी संस्कृत टीका) स्वयमेव भवतीति स्वयंभू र्जग-दादिकारणम्, "स कारणं करणाधिपाधिपो न चास्य कश्चिज्ज-नितानचाधिप" इतिश्वेता श्वतरोपनिषत्, तं स्वयंभुवम् । अतएव विश्वं जगत्सृजत्युत्पादयतीति विश्वसृग् जगदुत्पादकस्तं विश्व-सृजम् । विकारै "र्जन्ममरणादिभि र्ज्ञानस्य कदाचिदपि न्यूनत्वा-धिकत्वात्मकै र्वा" परिणामै: शून्यो विहीन स्तं विकारशून्यं सदै-कारसं सच्चिदानन्दस्वरूपमित्यर्थ: । जनुषां प्राणिनाम् । गाव इन्द्रियाणि चरन्तस्मिन्निति गोचर इन्द्रियाणां विषय: "विषया अमी गोचरा इन्द्रियार्था" श्चेत्यमर:, नगोचरोऽगोचर इन्द्रिया-विषयस्तं अगोचरम् । ध्यानगम्य मित्यर्थ: । शुचिं पवित्रं निष्कलंक

मित्यर्थः। विभुं सर्व्वत्रव्यापकं सर्व्वशक्तिमन्तं वा परमात्मानं प्रणम्य सर्व्वोन्नतेन शिरसा नमस्कृत्य। सत्यानि च धर्म्मस्येमानि लक्षणानि चिह्नानि सद्धार्म्मिकलक्षणानि मनूदितानीति शेषः। यथाहमनुः—धृतिःक्षमा दमोऽस्तेयं शौच मिन्द्रिय-निग्रहः।

धीर्विद्या सत्य मक्रोधो दशकं धर्म्म-लक्षणम्॥

तानि तै रन्वितं युक्तं सद्धार्म्मिक-लक्षणान्वितम्। इदं मद्धृद्धिस्थम्। मनोहरं सुन्दरम्। काव्यम् निबन्धम्। विवर्ण्यते वर्णनं क्रियते। मयेतिशेषः। काव्येऽत्र वंशस्थवृत्तम्। यथोक्तं पिङ्गलाचार्य्येण "वंशस्था जतौ जरौ"। अन्तिमं तु मालिनी-वृत्तम्, तल्लक्षण मपि तत्रैव द्रष्टव्यम्॥

(भावार्थ-बोधिनी-भाषा-टीका) सर्व्वशक्तिमान् परमात्माकी वन्दना करके यह धार्म्मिक-लक्षण-वर्णन काव्य बनाता हूं॥१॥

नमस्कारात्मकं मङ्गलं विधाय, धर्म्मः की दृश इत्युत्पन्नप्रश्नस्योत्तरं कवि र्निदर्शयन्नाह—

विधे र्विधानस्य विनीत-भावतो
जगन्नियन्तु र्नियमेन सेवनम्।
प्रदर्शितं यन्मनुनाऽपि तत्स्मृतौ
तदेव धर्म्मो दश-लक्षणात्मकः॥२॥

(सु० सं० टी०) विदधाति विशेषेण पोषयति धारयति वा विश्वमिति विधि र्विश्वपोषकः सर्व्वाधार स्तस्य विधेः। जगत्संसारं नियच्छति सृष्टिस्थितिप्रलयात्मकभावं गमयतीति (निपूर्वकाद्

यमु उपरमे भौवादिकात् तृच्, धातूनामनेकार्थत्वाद्वृत्त्यर्थकोऽव्ययम्) जगन्नियन्ता तस्य जगन्नियन्तुः सर्व्वशक्तिमतः। विनीतो विनयान्वितश्चासौ भावः स्वभावश्च विनीतभाव स्तस्मात् "पञ्चम्यास्तसिल्" विनम्रस्वभावात्। नियमेन यथारीत्या। विधीयन्तेऽनेन कर्म्माणीश्वरोपदिष्टान्यग्निहोत्रादीनीति विधानं वेदशास्त्रम्। वेदास्तु स्वतः प्रमाणम्। तत्र यल्लिखितं तन्निःशङ्कतया स्वीकर्त्तव्यम्। परमात्मोक्तत्वात्, तस्यचाऽभ्रान्तत्वात्। शास्त्रं तु मन्वादिभि-र्महर्षिभिः प्रणीतानि धर्म्म-पुस्तकानि। तत्र यल्लिखितं तद्वेदानुकूलतयैव मन्तव्यम्। नतु प्रतिकूलतया, तेषां परतः प्रमाणत्वात्। महर्षयोपि मनुष्या एवासन्। मनुष्याणाञ्च जीव कोटिस्थत्वादल्पज्ञत्वं प्रसिद्धमेव। सर्व्वज्ञ स्त्वेक ईश्वर एव। तस्य विधानस्य यत्सेवनं तदेव धर्म्म इति मनुनापि तस्य स्मृति स्तत्स्मृति स्तस्यां मनुस्मृतावित्यर्थः। प्रदर्शितं निर्दिष्टम्। अन्यत्राप्यन्यै र्यथा-"चोदना लक्षणोऽर्थो धर्म्म" इति जैमिनिः। यतोऽभ्युदय निःश्रेयससिद्धिः स धर्म्म इति कणादः। दशैव लक्षणानि धृत्यादीन्यात्मा कलेवरम् "कलेवरे प्रयत्ने च स्वभावे परमात्मनि। स्वान्ते धृतौ मनीषाया मात्मानं कवयो विदुः" इति शाश्वतः। यस्यासौ दशलक्षणात्मकः। अस्तीति शेषः ॥२॥

(भा० बो० भा० टी०) विनयसे ईश्वरकी आज्ञाका नियम-पूर्वक पालन करना ही मनुजीने धर्म्म बतलाया है, उसके धृति आदि दश अङ्ग हैं ॥२॥

धर्म्मस्य सामान्य स्वरूपं दर्शयित्वा तदङ्गभूत
लक्षणानां महत्वं वर्णयन्नाह—

सुलक्षणाश्च सुसेवनाद् द्रुतं
भवोद्भवा भूतिमवाप्य भूयसीम् ।
महत्व मूर्द्ध्वं महतां महौजसो
मनोविशुद्ध्यात्र भवन्ति भूतले ॥ ३ ॥

(सु० सं० टी०) सुष्ठु लक्षणानि सुलक्षणानि तानि मनूक्त धर्म्मचिह्नानि तेषां सुष्ठु सेवनं तस्मात् सम्यक्तया परिपालनात्, भवे संसारे "प्राप्ति संसार सत्तासु जन्म शंकरयो र्भवः" इति शाश्वतः उद्भवा जनिङ्कृता मनुष्या इत्यर्थः । भूयसीं बहुलां भूतिं ऐश्वर्य्यम् । "विभूतिर्भूति रैश्वर्य्यम्" इत्यमरः । महतां पूजनीयानां ऊर्द्धवं समुन्नतं महत्वं महिमानं च । अवाप्य लब्ध्वा । मनसो विशुद्ध्या पवित्रतया । अत्र भूतले पृथिव्याम् । द्रुतं झटिति । महद् अपरिमित मोजस्तेजो येषां ते महौजसः प्रभूततेजसो भवन्ति । यथाह मनुः—दशलक्षणानि धर्म्मस्य ये विप्राः* समधीयते ।
अधीत्य चानु वर्तन्ते ते यान्ति परमांगतिम् ॥

(भा० बो० भा० टी०) धर्म्म के इन सुन्दर लक्षणों के पालन से मनुष्य प्रभूत सम्पदा और बड़ोंकी बड़ाईको पाकर मनकी शुद्धतासे बड़े तेजस्वी हो जाते हैं ॥३॥

---

* विप्रान्ति प्रयत्नेन पूरयितुं चिकीर्षान्ति दुःख भाजां मनोरथा निति विप्राः कारुणिका इत्यर्थः ॥ ३ ॥

धार्म्मिक लक्षणानां महत्वं वर्णयित्वा तेषामधिकारिवर्गं निदर्शयिष्यन्नाह—

मनुष्यवर्य्यैः खलु पूर्व्व-जन्मसु
सुसञ्चितो यैः शुभकर्म्मसञ्चयः ।
त एव धर्म्मागत-लक्षणान्वितं
भवन्ति भोक्तुं दशकं त्विहोत्सुकाः ॥४॥

(सु० सं० टी०) यै र्मनुष्यवर्य्यै र्मानवमुख्यैः । खलु निश्चयेन । पूर्व्वाणि च तानि जन्मानि पूर्व्वजन्मानि, बहु बचननिर्देशादनेक जन्मानीति फलितम्, तेषु शुभानि सर्व्वेभ्यः सुखप्रदानि च तानि कर्म्माणि तेषां सञ्चयः संग्रहः, सुसञ्चितः सम्यक्तयोपार्जितः, स्त एव तु, इह अस्मिन्नपि जन्मनीत्यर्थः । धर्म्मे आगतानि धर्म्माङ्ग भूतानि च यानि लक्षणानि धर्म्मागत लक्षणानि तै रन्वितं दशकं दशसंख्यापरिमितम् । भोक्तुंआस्वादयितुं परिपालनायेत्यर्थः । उत्सुकास्तत्परा भवन्ति भवितुंशकुवन्तोत्यर्थः ॥ ४ ॥

(भा० बो० भा० टी०) जिन मनुष्योंने पूर्व्वके अनेक जन्मोंमें शुभकर्म्मोंका उपार्जन किया है वे ही इस जन्ममें धर्म्मके दश लक्षणोंका उपभोग कर सकते हैं ॥ ४ ॥

अथ क्रमेण धर्म्म लक्षणवर्णनपरः कविर्धर्म्मस्याद्य लक्षणं धृत्याख्यं वर्णयन्नाह—

विहन्यमाना अपि विघ्न-सम्भवै
र्मुहुर्मुहुः सर्व्व-सुखेषु कर्म्मसु ।
प्रयान्ति यत्नेन यतीन्द्र-वृत्तयो
धृतिं धरायां हि विवृद्धि सिद्धये ॥ ५ ॥

(सु० सं० टी०) सर्व्वेभ्यः सुखान्यानन्दोत्पादकानीति सर्व्वसुखानि तेषु सर्व्वसुखेषु सर्व्वेभ्य उपकारकेष्वित्यर्थः, कर्म्मसु क्रियासु "कर्म व्याप्ये क्रियायां" श्रेति रुद्रः । विघ्न संभवैः कार्य्यबाधकै रनेकाभि र्बाधाभि रित्यर्थः । मुहुर्मुहुः भयो भूयः । विहन्यमाना विह्वलीकृता अपि यतन्ते ("यतो प्रयत्ने" इत्यस्मा द्धोवादिकाद्धातोः सर्व्व धातुभ्य इन" इत्यौणादिकसूत्रेण इन् प्रत्ययः) इति यतयः प्रयत्नवन्तः स्तेषु इन्द्राः (इन्द्र शब्दोऽत्र श्रेष्ठत्ववाचकः) श्रेष्ठा स्तेषां वृत्ति रिव वृत्ति र्जीवनं "वृत्तिर्व-र्त्तन जीवने" इत्यमरः । येषां ते यतीन्द्रवृत्तयः उद्योगिनो जनाः धीरा इत्यर्थः । यत्नेनोपायेन (सर्व्वोपकारकाणां कर्म्मणाम्) विवृद्धिः समुन्नति स्तस्याः सिद्धये साफल्याय । हि विशेषेण "हि शब्दः स्याद्विशेषार्थे कारणार्थेऽवधारणे" इति शाश्वतः । धरायां पृथिव्याम्, धृतिं धैर्य्यम् "धृतिर्योगान्तरे धैर्य्ये धारणाध्वर तुष्टिषु" इति विश्वः । प्रयान्ति समुपगच्छन्ति धारयन्ती त्यर्थः । नतु विरमन्तीति भावः । यथा—निन्दन्तु नीति-निपुणा यदि वास्तुवन्तु, लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् । अद्यैव वा

मरण मस्तु युगान्तरे वा न्याय्यात्पथः प्रविचलन्ति पदं धीराः। इति भर्तृहरिः ॥ ५ ॥

(भा० बो० भा० टी०) सबकी भलाई के कामों में तत्पर मनुष्य अनेक बाधाओंके द्वारा वारंवार रोके जाने पर भी पृथ्वी पर कर्म्म-वीर बन कर यत्न-पूर्वक कार्य्य सफलता की प्राप्तिके लिये धृति अर्थात् धीरजको धारण करते हैं ॥ ५ ॥

धर्म्मस्य प्रथमाङ्ग भूतं धृत्याख्यं लक्षणं
वर्णयित्वा द्वितीयं लक्षणं क्षमेति
सञ्ज्ञं कथयितुमना आह—

अशक्त-शक्तेषु समान-दर्शिनः
कृतापराधेऽपि कृपापरायणाः।
विमूलयन्तो विगतात्म-वृत्तिजं
क्षमाभिधं लक्षण मुद्धरन्त्यहो ॥६॥

(सु० सं० टी०) न सक्नुवन्ति मनोरथान् साधयितुं नार्हन्तीत्यशक्ता निर्बलाश्च शक्ताः सबलाश्च ते अशक्तशक्ताः स्तेषु निर्बल-प्रबलेष्वित्यर्थः। समानं तुल्यं पश्यन्तीति तच्छीलाः समान दर्शिन स्तुल्यदृष्टयो मनुष्याः। कृतोऽपराधो येनासौ कृतापराध-स्तस्मिन्नपि कृपा एव परं अयनं पन्थाः "अयनं पथि सूर्य्यस्याप्यु दग्दक्षिणतो गतौ" इति शाश्वतः येषां ते कृपापरायणा दयां दर्शयितु मुत्सुकाः। विगता प्रस्खलिता आत्मनो वृत्तिः स्वभा-वो यस्य तस्माज्जायते इति विगतात्मवृत्तिज स्तं तथाभूतमपराधं

विमूलयन्तो निर्मूलं कुर्वाणाः, अर्थात् अपराधिगत माधेय भूत मपराध मेव विनाशयन्तो नत्वाधार भूत मपराधिनम् । तं तु सज्जनतां गमयन्त एव क्षमाभिधं धर्म्मस्य द्वितीयं लक्षणं उद्धरन्ति सम्यक्तया परिपालयन्तीत्यर्थः । अहो आश्चर्य्य मेतत् ॥ ६ ॥

(भा० बो० भा० टी०) छोटे बड़े सभी पर एकसी दृष्टि तथा अपराधी पर भी दया रखने वाले मनुष्य उसके अपराधपरक विचारों को मिटाते हुए धर्मके क्षमा नामक लक्षणका पालन करते हैं । ॥६॥

धर्म्मस्य द्वितीय मङ्गं क्षमाख्यं वर्णयित्वा तृतीय मङ्गं दमाख्यं विदर्शयिष्यन्नाह

मनोनिरुद्ध्याविषयादकिल्बिषा
दुरात्मनः प्राण-धनाप हारिणः ।
समुन्नतं योग-युजां मही-भुजां
पदञ्च गच्छन्ति दमेन सत्वरम् ॥ ७ ॥

(सु० सं० टी०) न विद्यते किल्बिषं पापं येषां येषु वा ते अकिल्बिषा धर्म्मात्मानो जनाः । आ समन्ता द्विषया द्विमोहक मार्गान्मन श्चित्तम्, यद्वा आविषयात्समन्ता जनपदात् " इन्द्रियार्थे जनपदे विषयो गोचरे पदे " इति शाश्वतः । प्राणाँश्च धनानि-चापहरन्तीति तच्छीलाः प्राणधनापहारिणः तांस्तथा भूतान् । दुष्ट आत्मा स्वभावो "आत्मा कलेवरे यत्ने स्वभावे परमात्मनि । चित्ते धृतौ च बुद्धौ च परव्यावर्त्तनेऽपि च" इति धरणिः, येषां ते

दुरात्मानो निन्द्यस्वभावास्तान् दुरात्मनश्च । दमेन दमनेनेत्यर्थः "दमः स्यात्कर्दमे दण्डे दमने दमथेऽपिच" इति हेमचन्द्रः । सत्वरं शीघ्रं निरुद्धय अवरोधनं विधाय पामर जनांस्तु दण्ड-दानेन सदुपदेशादिभि व । यथा क्रमं योगं परमात्माध्यानम् "योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु" इत्यमरः, युञ्जन्ति प्रयतन्ते इति योगयुजो ध्यानपरा योगिन इत्यर्थः । तेषां योगयुजाम् । महीं पृथिवीं भुञ्जन्ति विपुरतीति महो भुजो भूपाला स्तेषां महीभुजाञ्च समुन्नतं सर्व्वत-उत्कृष्टं पदं स्थानम्, "व्यव-साये परित्राणे पादतच्चिह्नयोरपि । वस्तुस्थानापदेशेषु पदं स्या-द्वाक्यशब्दयो" रिति शाश्वतः । गच्छन्ति प्राप्नुवन्तीत्यर्थः । यथा सीरध्वज* भर्त्तृहरि प्रभृतयः ॥ ७ ॥

(भा० बो० भा० टी०) दुर्व्यसनोंसे मनको रोकना ही दम है, धर्म्मा-त्मा पुरुष इसी दमके द्वारा कुमार्गसे मनको तथा देशसे दमन नीतिके द्वारा दुर्जनोंको शीघ्र हटाकर योगियों तथा राजाओंके उत्तम पदको पाते हैं ॥७॥

---

* पुरा मिथिलायां ह्रस्वरोमाख्यः कश्चिदिक्ष्वाकुवंशोत्पन्नो नृपति र्बभूव । तस्य द्वौ पुत्रौ सीरध्वजः कुशध्वज श्चेति नामानौ विद्येते स्म । तयो र्मध्ये सीरध्वज एव ज्येष्ठः सकलशास्त्रपारग आसति । स खलु स्वकीयां चित्तवृत्तिं विपथान्निरुरोध । दुष्टानपि सुशासनेन निरुद्धय, प्रजाना श्च पुत्रवत्पालना त्तेषां जनकत्व मुपागमत् । देशदेशान्तरेभ्यो मुनय स्तत्सकाशाद्ब्रह्मज्ञानस्य प्राप्तये तत्राऽऽजग्मुश्च । तस्योपदेशैः परं सन्तोषं गच्छन्तस्ते तं "राजर्षि" रित्यवादिषुः । अतएवासौ राजर्षिजनको, जनक इत्यादिभि र्नामभिः भुवस्तले प्रसिद्धिङ्गतः । विष्णुपुराणे द्रष्टव्यम् ।

भर्तृहरे श्चरितं तु सर्व्वत्रैवप्रसिद्धम् । सोऽपि राजर्षि पद मशिश्रियत् । तस्य साक्षिभूतं तन्निर्म्मितं शतकत्रय मिदानी मपि विदुषां दृष्टि पथे सुधांशु-रिव पथिकायते ।

धर्म्मस्य तृतीय मङ्गं दमाख्यं दर्शयित्वा कवि रस्तेयं चतुर्थं लक्षणं दर्शयितुमना आह—

कलेवरेणापि गिराऽपि चेतसा
कदापि केषा मपि वस्तु-सञ्चयम्।
अचोरयन्तो मनुजाः स्वभावतः
पवित्र मस्तेय-विधिं वितन्वते ॥ ८ ॥

(सु० सं० टी०) कलेवरेणापि शरीरेणापि गिराऽपि वचनेनापि चेतसा चित्तेनापि कदापि कस्मिन्नपि काले। केषामपि मनुष्याणामित्यर्थः। वस्तुसञ्चयं पदार्थसमूहम्। अचोरयन्त श्चोरयितुं नेच्छन्तो मनुजाः स्वभावतः पवित्रं पूतं, अस्तेय-विधिम् (चौरस्य कर्म्म स्वभावो वा चौर्य्यं तदेव स्तेयम्-विनाऽऽज्ञया-केषामपि वस्तूना मुत्थापनम्। तत्तु त्रिभिः प्रकारै र्भूयते—परोक्षभूते स्वामिनि तदीया मनुमतिं विनैव तद्वस्तूना मन्यत्र नियमन मेकः प्रकारः शरीरेण साधयितुं शक्यः। स्वामि-हित-साधनाय तद्वस्तु-रक्षणेच्छया तु तत्रापि नैष दोषः। कापट्येन वचसा जनान्प्रतारयित्वा तेभ्यो द्रव्य-सम्पादनं द्वितीयः, तद्यथा-भो मित्र! इदानीं सूर्य्यादीनां ग्रहाणा मतीव भयाविनी दशा भवन्त मभ्येति, अत स्तच्छमयितु मेतन्मितं द्रव्यमत्रानुष्ठाने परमावश्यकम्, तद्भवता साधयितव्यम्। नोचेत्तर्हि भवते विनाशमयः कालस्तूपस्थित एव। अहं तु केवलं भवदीयं मङ्गल मेवेच्छन्नेवं

ब्रवीमि, पश्यतु दीर्घकायपत्रकेऽस्मिन्यल्लिखितं ज्योतिर्विदा। देवी-देवाना मपि दृष्टि रीदृश्येव भवन्तं प्रति दरिद्दृश्यते। इत्यादि कानि कर्माणि* वचसैव भवितु मर्हन्तीति। तृतीयस्तु द्रव्यलिप्सया कस्यचित् पुरुषस्य सर्वत्र शत्रव मुत्पादयितुं मनसा चिन्तनम्। यदा खलु शत्रवः सम्यक्प्रकारेणैनं विदूयेरँस्तदाऽसौ तेभ्यः स्वकीय परित्राणाय प्रार्थयन् द्रव्यहस्तो मे समीपमवश्य मेतु, अहमपि तद्द्रव्यं गृहित्वा मत्सङ्केतानुवर्त्तिन स्तदीयान्नि-पून्निन्दयन्तमा श्वासयिष्यामीति। एतत्प्रकारकं कर्म्म न कर्त्तव्य मिति भावोऽस्तेयम्, तस्याऽस्तेयस्य विधिं विधानम्) वितन्वते विस्तारयन्ति धराया मिति शेषः॥

(भा० बो० भा० टी०) शरीरसे वाणीसे एवं मनसे किसीकी भी वस्तु-ओंको न चुराते हुए मनुष्य स्वभाव ही से पवित्र अस्तेय (चोरी त्याग) के विधानका विस्तार करते हैं। अर्थात् चोर कर्म न करना ही अस्तेय है ॥८॥

मनस्तु सत्येन जलेन विग्रहं
सुविद्ययाऽऽत्मान मथोतपस्यया।
धियञ्च मोक्षैकधिया मनीषिणो
विशौचयन्तो हि भजन्ति शौचताम् ॥९॥

---

* एवं विधं कर्म्म धूर्त्ता एवात्मानं सर्व्वज्ञं मन्यमाना ज्योतिषिकाः कुर्व्वन्ति न तु यथार्थ तत्त्वज्ञाः। ते तु यथार्थं मेव गृहागतं प्रश्न कर्त्तारं दर्शयन्ति। यथा स्वनामधन्याः सुधाकर द्विवेदिनो बापू देवा दयश्च॥

(सु० सं० टी०) सत्येन (प्रत्यक्षादिभिः प्रमाणैः परीक्षितं यादृशं स्वात्मनि स्थितं भवेत्तादृश मेव बहिः प्रकाशन मिति सत्यम् तेन) यथार्थ मन्तव्येन वक्तव्येन च मनश्चित्तम्। जलेन विग्रहं शरीरम् "विग्रहो युधि विस्तारे प्रविभागशरीरयोः" इति हेमचन्द्रः। सुष्टु विद्या सुविद्या सांसारिकानां पदार्थाना मसंशमात्मकं ज्ञानम्, तया अथो अपिच विकल्पेन वा "अथाथो संशये स्याता मधिकारे च मङ्गले। विकल्पानन्तरप्रश्नकात्स्न्यारंभसमुच्चये" इति मेदिनी। तपस्या यमनियमानामनुष्ठानम्, (यमनियमा स्त्विमे—

"ब्रह्मचर्य्यं दया क्षान्ति र्ध्यानं सत्य मकल्कता।
अहिंसाऽस्तेय माधुर्य्ये दमश्चेति यमाः स्मृताः" इति याज्ञवल्क्यः। ब्रह्मचर्य्य मिद्रियाणा मवरोधन मिन्द्रिय निग्रहः इत्यर्थस्तदनुपदमेव वक्ष्यते। दयाऽनुकम्पा। क्षान्तिः क्षमा पूर्वमे दर्शिता। ध्यानं परमात्मचिन्तनम्। सत्यं तत्थ्य वचनम्" वक्ष्यते। अकल्कता कुटिलताया अभावः। अहिंसा सर्व्वेभ्योऽभयदानम्। अस्तेयं चोर कर्मस्य त्यागः। माधुर्य्यं कोमलस्वभावेन वर्त्तनम्। दम श्चेतसो दुर्वर्त्तनान्निरोधः। एते यमाः। अतो नियमाः

"स्नानं मौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः।
नियमो गुरु शुश्रूषा शौचा क्रोधा प्रमादता" ॥

इति याज्ञवल्क्यः। स्नानं जलादिभिः शारीरिकशुद्धिः। मौनं वाक्संयमनम्। उपवासो लंघनम्, उदरेऽन्नस्य सम्यक्तया पचनं न भवेत्तदा भोजनं न कुर्य्यादिति भावः। इज्या यजनं,

अहिंसात्मकयागः, विदुषां माननीयानां वृद्धानां गृहेस्थितानां पित्राद्दीनाञ्च सत्कारो वा। स्वाध्यायो वेदादिशास्त्राणां परिशीलनम्। उपस्थनिग्रहम् अस्यार्थ इन्द्रियनिग्रहलक्षणे स्पष्ट एव। गुरुशुश्रूषा गुरोः सेवनम्, गुरुशब्देन माता, पिता, आचार्य्य श्चेते ग्राह्याः। शौचं पवित्रता। अक्रोधः शान्तिः (अग्रे वक्ष्यामि)। अप्रमादता अनुत्पातत्व सुशीलत्वमित्यर्थः। एते नियमा) तया तपस्यया चात्मानम्। मोक्षैकधिया ज्ञानेन "मोक्षे धीर्ज्ञान" मित्यमरः। धियं बुद्धिम्। हि निश्चयेन विशोधयन्तः पवित्रतां गमयन्तो मनीषिणो बुद्धिमन्तः शौचतां शौचस्य पञ्चमधर्म्मलक्षणस्य भावं भजन्ति यथाह मनुः।

अद्भि र्गात्राणि शुद्ध्यन्ति मनः सत्येन शुद्ध्यति।
विद्यातपोभ्यां भूतात्मा बुद्धि र्ज्ञानेन शुद्ध्यति ॥ ७॥

(भा० बो० भा० टी०) सत्यके द्वारा मनको, जलसे शरीरको, विद्या और तपके द्वारा आत्माको और ज्ञानसे बुद्धिको पवित्र करते हुए विद्वान लोग धर्मके पांचवें लक्षण शौचका पालन करते हैं ॥९॥

धर्म्मस्य पञ्चमलक्षणं शौचाख्यं वर्णयित्वा षष्ठमिन्द्रियनिग्रहं वर्णयन्नाह—

स्वभावजं यद्विपथेऽवगाहनं
तदिन्द्रियाणाञ्च निरुद्ध्य वर्णिनः।
नियोजयन्तो विधिबोधितेध्वनि
सदैन्द्रियं निग्रहमत्र बिभ्रति ॥१०॥

(सु०सं०टी०) द्विविधानीन्द्रियाणि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च तेषां मध्ये पञ्च ज्ञानेन्द्रियाणि श्रोत्रं, त्वक्, चक्षुषी, जिह्वा, नासिकेति। पञ्च च कर्मेन्द्रियाणि, पायुः, उपस्थं हस्तौ, पादौ, वागिति। एतेषां विपथे कुमार्गे यद् अवगाहनं प्रवेशः स्वभावजं स्वाभाविकम्। तत्सदा निरुद्ध्य निरोधयित्वा। विधिना परमेश्वरेण बोधित उपदिष्टो विधिबोधितो वेदस्तस्मिन्विधिबोधिते अध्वनि वैदिके-पथीत्यर्थः। नियोजयन्तः प्रेरयन्तो वर्णिनो ब्रह्मचारिणः अत्र भूतले इन्द्रियाणा मयं ऐन्द्रियं निग्रहम् निरोधं बिभ्रति पोषयन्तीत्यर्थः ॥१०॥

यथामनुः—

इन्द्रियाणां विचरतां विषयेष्वपहारिषु।
संयमे यत्नमातिष्ठेद्विद्वान्यन्तेव वाजिनाम् ॥

अस्य श्लोकस्यायमभिप्रायः—इन्द्रियाण्येवाश्वाः, मनश्चाभीषवः, शरीरमेव स्यन्दनम्, जिवश्च सारथिः। यथा सारथे रसावधानतया मुश्चिताभीषवो मदोन्मत्ता वाजिनः स्यन्दन मुदुघातिनीं भूमिं नेनीयन्ते तथैवेन्द्रियाण्यपि मनसः शैथिल्येन शरीरं कुमार्गे स्वेस्वे विषये नेनीयन्त्येव। अतो वाजिनां यन्तेव विद्वान् इन्द्रियाणां संयमे निग्रहे यत्नं कुर्यादिति। एष्विन्द्रियेष्वासक्त्यनासक्त्योः फल माह मनुः—

इन्द्रियाणां प्रसंगेन दोष मृच्छत्यसंशयम्।
सन्नियम्य तु तान्येव ततः सिद्धिं नियच्छति।

इन्द्रियाणां प्रसंगेन विषयेष्वासक्त्या दोषं दुर्गतिं ऋच्छति

प्राप्नोति, नास्त्यत्र सन्देहः। ततः अतएव तानीन्द्रियाणि संनियम्य सम्यक्प्रकारेणावरोधनं विधाय एव यथासुखं सिद्धिं समुन्नतिं नियच्छति समधिगच्छतीत्यर्थः।

(भा० बो० भा० टी०) इन्द्रियोंका कुमार्गमें जाना स्वाभाविक है, इसलिये उन्हें कुमार्गसे हटाकर सुमार्गमें ले आना यही इन्द्रियनिग्रह है ब्रह्मचारी इसीका पालन करते हैं ॥ १० ॥

धर्म्मस्य षष्ठमङ्गमिन्द्रियनिग्रहं निदर्शयित्वा सप्तम मङ्गं धीरिति नामकं कथयन्नाह—

समागते स्वात्मनि संशयोद्भवे
तदुद्विनाशाय विवेचनात्मिका—
सुभावनाया अपि शुद्ध-कारणं
तदुच्यते धी रिति दीर्घदर्शिभिः ॥११॥

(सु० सं० टी०) स्वकीय आत्मा स्वात्मा तस्मिन्संशयस्य सन्देहस्य य उद्भवः प्रादुर्भाव स्तस्मिन्संशयोद्भवे समागते प्राप्ते सति,तस्य प्राप्तसंशयोद्भवस्य उत्कृष्टो विनाश स्तदुद्विनाश स्तस्मै विवेचनात्मिका निर्णयपरा या सुष्ठु भावना सुभावना सुन्दर विचार स्तस्याः विवेचनात्मिकासुभावनाया अपि (यदिति शेषः)। शुद्धं पवित्रं कारणं हेतु स्तदेव धीः प्रज्ञेति दीर्घदर्शिभिः पांण्डतै रुच्यते निगद्यते ॥ ११ ॥

(भा० बो० भा० टी०) अपने आत्मामें संशयके उत्पन्न होनेपर संश-

यको मिटानेके लिये निर्णय करनेवाली सुन्दर भावनाका जो शुद्ध कारण है उसे ही पण्डित लोग धी कहते हैं ॥११॥

एवं सप्तमलक्षणं धीराख्यं वर्णयित्वा विद्याख्य-
मष्टमं लक्षणं वर्णयितु माह—

भवेऽद्भुतानेकपदार्थ-संग्रहो-
पलब्धविज्ञान मसंशयात्मकम् ।
अतत्थ्यतत्थ्यैकविवेकवर्द्धनं
तदेव विद्याऽस्यनुमीयते बुधैः ॥१२॥

(सु० सं०टी०) भवे संसारे, अतत्थ्यस्य अतथ्यस्य तत्थ्यस्य सत्यस्य चैकः केवलं विवेको विचारः "विवेकः स्याज्जलद्रोण्यां पृथग्भावविचारयोः" इति मेदिनी, तं वर्द्धयति विस्तारयतीति तद् अतत्थ्यतत्थ्यैकविवेकवर्द्धनम् । न विद्यते संशय आत्मनि यस्य "आत्मा कलेवरे यत्ने" इति धरणिः, यस्य तद् असंशयात्मकम् । अद्भुतो विस्मयोत्पादकः अनेकानां पदार्थानां यः संग्रहः समूह स्तस्मात् उपलब्धं प्राप्तं यद्विज्ञानं तदद्भुतानेकपदार्थसंग्रहोपलब्धविज्ञानम्, सांसारिकपदार्थानां यथार्थज्ञान मित्यर्थः । तदेव विद्या अस्तीति बुधै र्विद्वद्भरे नुमीयते अनुमानं क्रियते ॥ १२ ॥

(भा० बो० भा० टी०) सांसारिक पदार्थोंसे उपलब्ध जो सन्देह रहित ज्ञान है उसे ही पंडित जन विद्या कहते हैं ॥१२॥

धर्म्मस्य विद्याख्य मष्टम मङ्गं विवर्ण्य नवमं
सत्याख्यं कथयिष्यन्नाह—

पदार्थकानां विधिकल्पिता व्रजे
पृथक्पृथक्त्वेन तु धर्म्मकल्पना ।
यथायथं धर्म्मिगतस्य वर्णनं
प्रकीर्तितं सत्य मिहैव सज्जनैः ॥१३॥

(सु० सं० टी०) पदार्थकानां "स्वार्थेकन्" वस्तूनां व्रजे समूहे । तु । पृथक्पृथक्त्वेन भिन्नभिन्न प्रकारैः धर्म्मस्य स्वभावस्य "धर्म्मोऽस्त्री पुण्य आचारे स्वभावोपमयोः क्रतौ" इति मेदिनी। स्वरूपस्ये त्यर्थः "स्वरूपं च स्वभावश्च" त्यमरः । कल्पना तु विधिना परमात्मना कल्पिता संभावितैव । अतएव धर्म्मोऽस्यास्तीति धर्म्मी पदार्थ स्तस्मिन्गतः स्थितो धर्म्मः स्वभावः स्वरूपं वा पदार्थत्वम्, तस्य धर्म्मिगतस्य पदार्थस्थितस्य स्वरूपस्य यथायथं यथादृष्टं श्रुतं वा प्रत्यक्षादिभिः प्रमाणैः परिक्षितं यादृशं स्वात्मनि स्थितं तादृशमेव वर्णनं वहिःप्रकाशन मित्यर्थः । इह अस्मिन् भूतले सज्जनैः आर्य्यपुरुषैः "सत्य" मिति प्रकीर्तितं कथित मिति भावः, अस्तीतिशेषः ॥ १३ ॥

(भा० बो० भा० टी०) परमात्माने प्रत्येक पदार्थमें भिन्न २ स्वरूप और गुण रक्खे हैं इसलिये जिस पदार्थमें जैसा स्वरूप एवं गुण हो उस पदार्थके लिये वैसा ही अपने मनमें समझना और कहना, विपरीत कल्पना नहीं करना बस यही सत्य है ॥१३॥

धर्म्मस्याष्टमं सत्याख्यमङ्गं प्रदर्श्य दशममङ्गं मक्षो-
धाख्यं प्रदर्शयितुमना आह—

दुरात्म-दुर्वृत्ति-समुत्थ-भावतः
समेति कोपोऽपि मनःसु धीमताम् ।
अतोऽस्पृशन्त स्तमजात-शत्रवः
प्रशान्त मक्रोध मुपासते जनाः ॥१४॥

(सु० सं० टी०) दुरात्मनां पामर-मनुष्याणां दुष्टा वृत्ति र्दुर्वृत्ति र्निन्द्यव्यवहार स्तस्याः समुत्थः प्रोत्थित उत्पन्न इत्यर्थः, यो भाव श्चेष्टा तस्मात् । धीमतां मनीषिणा मपि मनःसु कोपः क्रोधः समेति समुत्पन्नो भवतीत्यर्थः । अतोऽस्माद्धेतो स्तं क्रोधं अस्पृशन्तोऽनुत्पादयन्त इत्यर्थः । अजाता अनुत्पन्नाः शत्रवो येषां ते तथाभूता जनाः प्रशान्तं शान्तिमयं अक्रोधं क्रोधस्याभावम् । उपासते समुपगच्छन्ति ॥ १४ ॥

(भा० बो० भा० टी०) दुर्जनोंके दुर्व्यवहारसे उत्पन्न हुए वैमनस्यके कारण बुद्धिमानोंके मनमें भी गुस्सा आ जाता है, उस गुस्सेसे दूर रहते हुए लोग अजातशत्रु होकर शान्तिमय अक्रोध (गम) का पालन करते हैं॥१४

धर्म्मस्य धृत्यादीन्दशसंख्यापरिमिताँल्लक्षणान् वर्णयित्वा
कवि स्तेषां पालनाय जनान्प्रार्थयति

विहाय दारूपलरज्जुगुम्फिताः
स्रजः समादृत्य सुलक्षणावलीम् ।
जपन्त एनां प्रभवाः सुबोधिनीं
सुसाधनं प्राप्य भवन्तु मानवाः ॥१५॥

(सु० सं० टी०) दारुभिः काष्ठविशेषै रुपलैः पाषाणविशेषै-र्वा रज्जुभिश्च गुम्फिता निर्म्मिताः स्रजो मालाः (जाप्यमालाः कण्ठीकृता माला श्चेत्यर्थः) विहाय परित्यज्य (अप्रयोजनत्वा-दितिभावः) एनां सुबोधिनीं धर्म्म-मार्ग-प्रदर्शिकाम् । सुलक्षणा-वलीम् (धर्म्मस्य दश लक्षणान्येव मणय स्तैः प्रगुम्फिता मित्यर्थः) समादृत्य जपन्त श्च भो मानवाः ! भवन्तः सुसाधनं सदुपायं धृत्यादि दशलक्षणस्वरूपं प्राप्य प्रभवाः समर्था भवन्तु ॥ १५ ॥

(भा० बो० भा० टी०) काष्ठादि निर्म्मित निरर्थक मालाको त्यागकर धर्म्मके दश लक्षणोंसे लक्षित मालाको जपो, जिससे आपको धर्म्मका बोध होगा और आत्मबल भी प्राप्त कर सकोगे ॥१५॥

धर्म्मस्य पवित्राचरणं विना नराणां का दशा

भोभवीतीति वर्णयन्कविराह—

विशुद्ध-धर्म्माचरणं विना भुवि
हिताहितज्ञानविशून्यवृत्तयः ।
प्रणिन्दितं विद्धयुपदिष्टवेदतो
विरुद्धभावाचरणञ्चरन्त्यघाः ॥१६॥

(सु० सं० टी०) विशुद्धं पवित्र श्च यद् धर्म्मस्य आचरणम् सेवनम् तद् विशुद्धधर्म्माचरणम् । तद्विना, हितस्य प्रियस्य वृद्धि-कारकस्येत्यर्थः, अहितस्य अनभीप्सितस्य च यज्ज्ञानं तस्मिन्वि-शून्या वृत्ति र्येषां ते तथा भूताः कृत्याकृत्यविचारमूढा इत्यर्थः । अघाः पापिनो जनाः,भुवि पृथिव्यां विधिना परमेश्वरेण उपदिष्टो

यो वेद स्तस्मा द्विरुद्धो यो भाव श्चेष्टा तस्य आचरणं सेवनं यत् प्रकर्षेण निन्दितं विगर्हितं (अस्तीतियोज्यम्) तद् चरन्ति प्राप्नुवन्तीत्यर्थः ॥ १६ ॥

(भा० वो० भा० टी०) पवित्र धर्म्माचरणके विना मनुष्य हिताहित ज्ञानसे रहित होकर ईश्वरकी आज्ञासे विमुख हो जाते हैं और निन्दित कार्य करते रहते हैं ॥१३॥

मूढ़ान्प्रबोधयितु मीश्वरं कविः

प्रार्थयन्नाह—

समेत्य तेऽपीद मुदार-पद्यजं
सुकाव्य मानन्दमयेध्वनि ध्रुवम् ।
चरन्त ऐश्वर्य्य मियुः सुसाधनै-
रितीह याचे जगतामधीश्वरम् ॥१७॥

(सु० सं० टी०) तेऽपि (येषां वर्णनं पूर्व्वस्मिन्षोडशे पद्ये कृतमस्ति) हिताहितज्ञानविशून्यवृत्तयोऽपि जना उदारपद्यजं सरलैः श्लोकै र्निर्म्मित मिदं सुन्दरं काव्यं समेत्य प्राप्य, आनन्द-मये सुख-पूरणे परमात्मोपदिष्टे वैदिके अध्वनि मार्गे चरन्तः समुपगच्छन्तः सुसाधनैः (दश लक्षणान्येव सुन्दरसाधनानीति भावस्तैः) ध्रुव मवश्यं ऐश्वर्य्यं महतीं सम्पदाम् इयुः प्राप्नुयुः । इत्यमुना प्रकारेण (अहमेतत्काव्यनिर्म्माता) इह स्मन्विषये जगतां लोकानां अधीश्वरं (अकथितञ्चेति कर्मसंज्ञा) स्वामिनम् याचे प्रार्थये ॥ १७ ॥

(भा० वो० भा० टी०) वे निन्दित मति जन भी इस सरल पद्योंवाले सुन्दर काव्यको पाकर सुखदायक वैदिक मार्गमें विचरते हुए अच्छे साधनों (दश लक्षणों) से ऐश्वर्य्यको प्राप्त करें, ईश्वरसे मैं ऐसी प्रार्थना करता हूं ॥१७॥

काव्य-पूर्त्तिं प्रकुर्वन्कविः सर्व्वेभ्य आशिर्वादात्मकं मङ्गल माचरन्नाह—

मनूदितै धार्म्मिक-लक्षणै र्युतं
यथासुखं काव्यमगास्त पूर्णताम्
मयेश-निर्दिष्ट-पथात्मना कृतं
भवेन्नराणां सुखलब्धिसाधनम् ॥१८॥

(सु० सं० टी०) मनुना उदितैः कथितै र्मनूदितैः । धर्म्मस्य इमानि (धृत्यादीनि दश) लक्षणानि, धार्म्मिकलक्षणानि तैः युतं, (शान्त रस१ प्रधानं प्रसाद२ गुणयुक्तं, पाञ्चाली३ समलंकृतं

---

१ सम्यग्ज्ञानसमुत्थानः शान्तो निस्पृहनायकः ।
रागद्वेषपरित्यागात्सम्यग्ज्ञानस्य चोद्भवः ॥ इति वाग्भटः ॥

२ यस्मादन्तः स्थितः सर्वः स्वयमर्थोऽवभासते ।
सलिलस्येव सूक्तस्य स प्रसाद इति स्मृतः ॥ इति जयदेवः
कुत्रचिन्माधुर्य्यसौकुमार्य्यो वापि, तल्लक्षणा विमे—
सरसार्थपदत्वं यत्तन्माधुर्य्य मुदाहृतम् ।
अनिष्ठुराक्षरत्वं यत्सौकुमार्य्यमिदं यथा इति वाग्भटः

३ " माधुर्य्य सौकुमार्य्योपपन्नापाञ्चाली" इति काव्यालंकार सूत्रम्
(कुत्रचिद्गौडीयापि)

वृत्त्यलंकारैरपि* विभूषितं अतएव मनोहरम्) काव्य मिदं यथा-सुखं आनन्दपूर्वकम्। पूर्णतां समाप्तिम् अगात्त अगच्छत् ईशेन परमात्मना निर्दिष्टो दर्शित श्चासौ पन्थाः ईशनिर्दिष्टपथो वैदिकधर्म स्तस्मिन् आत्मा मनो यस्यासौ ईशनिर्दिष्टपथात्मा तेन ईशनि-र्दिष्टपथात्मना मया (कृष्णचन्द्रेण सूरिणा) कृतं निर्म्मितं काव्यमेतन् नराणां मनुष्याणां सुखस्य लब्धिः प्राप्तिः सुखलब्धि-स्तस्याः साधनं उपायः सुखलब्धिसाधनम् भवेत् ॥१८॥

(भा० बो० भा० टी०) मनूक्त धर्म्मलक्षणोंसे युक्त यह सुन्दर काव्य पूर्ण हुआ। मेरा बनाया हुआ यह धार्म्मिक-लक्षण-वर्णन काव्य मनुष्योंके लिये सुखप्राप्तिका साधन हो ॥१८॥

भूयोपीश्वरं प्रार्थयन् कविराह—

भवतु भवतु नित्यं धर्म्म-भाजां सुवृद्धिः
शमयतु जगदीशो दुष्कृतां दुष्टकृत्तिम्।
कवि-कुल-महिमानं वर्द्धयन्तीव वल्ली
प्रसरतु भुवनेस्मिँल्लाल पौत्रस्य कीर्त्तिः ॥१७॥

(सु० सं० टी०) धर्म्मं भजन्तीति धर्म्म-भाज स्तेषां सुवृद्धिः समुन्नतिः नित्यं सदा भवतु भवतु अवश्यं भूयादित्यभावः जगदीशः परमात्मा दुष्कृतां अधर्म्मसेविनां दुष्ट-कृत्तिं निन्दि-तकल्पनां ब्रह्मचर्य्यविघातिनी दुष्टकाव्यरचना मित्यर्थः। ताम् शमयतु विनाशङ्ग मयतु। कवीनां कुलं कविकुलं तस्य महिमानं

* वृत्त्यलंकारादिकं तु यथास्थान मनुसन्धेयम्

अस्मिन् भुवने वर्द्धयन्ती लालस्य श्रीमल्लालसूरिणः पौत्रो लालपौत्र* स्तस्य एतत्काव्यकवयितुः कीर्त्ति र्यशो वल्लीव लतेव प्रसरतु विस्तारं प्राप्नुयात्। पद्य मिदं मालिनीवृत्तमयं तल्लक्षणं "मालिनी नौ म्यौ य्" इति पिङ्गलाचार्य्येण समुद्गीरितम्। ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च मङ्गल मवश्यं कर्त्तव्य मिति शिष्टानामाचार स्तमनुसृत्य काव्यस्यास्यादौ नमस्कारात्मक, मन्ते चोशिर्वादात्मकं पश्यन्तु पाठकाः। वस्तुनिर्देशात्मकं तु प्रति पद्यं समलङ्करो तीत्यलम् ॥१६॥


(भा० वो० भा० टी०) धर्म्मात्मा पुरुषोंकी नित्य समुन्नति हो, ईश्वर अधार्म्मियोंकी निन्दित कल्पनाओंको शमन करे। कविकुलकी महिमाको बढ़ाती हुई श्रीमल्लालसूरिके पौत्रकी कीर्त्ति जगतमें लताके समान विस्तारको प्राप्त हो ॥१६॥

इतिश्रीमेवाड़प्रदेशचित्तौरगढ़मण्डलान्तर्गतविल्वपुरवास्तव्य-
द्विवेद्युपाह्वमौद्गलवंशोद्भवश्रीमन्नारायणसूरिसूनु पंडित-
कृष्णचन्द्रसूरिनिर्म्मितं सुबोधिनीसंस्कृतटीका-
भावार्थबोधीभाषाटीकाभ्यांसमलंकृतं धार्म्मिक-
लक्षणवर्णनंनामखण्ड†काव्यंसम्पूर्णम्।

---

* श्रीमल्लालसूरिणः पुत्रः श्रीमन्नारायणसूरि स्तस्य पुत्रः " तस्यापत्य-मित्यण् " कृष्णचन्द्र सूरि र्विद्वद्वराणामनुचरोऽह मिति भावः ॥

† "खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारिच" इति विश्वनाथ कविराजः



शुद्धि-पत्रम्

अशुद्धयः	शुद्धयः	पृष्ठे	पङ्क्तौ
कुस्या	कुलस्या	३	७
परमाश्यकं	परमावश्यकं	३	१२
कोषानां	कोषाणां	३	१७
व्ययम्	प्ययम्	७	१
सुलक्षणना	सुलक्षणाना	८	१
भवोद्भ्वा	भवोद्भवा	८	२
उर्द्ध्वं	उद्ध्वं	८	६
लणान्वितं	लक्षणान्वितं	६	५
तुष्टिषु	तुष्टिषु	१०	१८
न्याय्य त्पथः	न्याय्यात्पथः	११	१
शक्ताः स्ते	शक्ता स्ते	११	१५
वत्तिः	वृतिः	११	२०
वत्तिज	वृत्तिज	११	२१
उंसंके	उसके	१२	६
विदर्शयिष्यन्	निदर्शयिष्यन्	१२	७
परमात्माध्यानम्	परमात्मध्यानम्	१३	४
निरुद्धय	निरुद्ध्य	१३	१८
गृहित्वा	गृहीत्वा	१५	७
स्थित	स्थितं	१६	२
लंघनम्	लङ्घनम्	१६	२
मात्मकं	यात्मकं	१६	६

पञ्च दशतमे पत्रे नवमपद्यस्य पूर्वं—

धर्म्मस्य तृर्य्यलक्षण मस्तेयं कथयित्वा कविः

पञ्चमं शौचाख्यं लक्षणं वर्णयन्नाह—

इति पठनीयम् ॥

RASHTRIYA SANSKRIT VIDYA PEETH
TIRUPATI.
LIBRARY
015/M00/1

विज्ञापनम्

मन्निर्म्मितानि निम्ननिर्दिष्टानि पुस्तकान्यपि यथाशीघ्रं प्रकाशितानि भविष्यन्तीति विदाङ्कुर्व्वन्तु सहृदयाः।

१ सचित्र-वर्ण-विनोदः
२ संयुक्त-वर्ण-विनोदः

} पुस्तक द्वय मिदं प्रचलित राष्ट्रभाषामयम् अस्य परिशीलनेन शिशवो भारतीयराष्ट्रभाषामयानि संस्कृतभाषामयानि च पुस्तकानि सम्यक्तया पठितुं समर्था भविष्यन्तीति निश्चयो मे। राष्ट्रीयभावानां धार्म्मिकभावाना ञ्चापि सन्निवेशोऽस्मिन् समुल्लसति।

३ अहिंसा-महत्त्व-वर्णनम्—काव्येऽस्मिञ्शास्त्रोक्त प्रमाणैर्हिंसायाः सर्व्वथा निराकरणम्, अहिंसाया श्च शास्त्रोक्त प्रमाणैः सम्यक्तया प्रतिपादनम्। काव्य मिदं संस्कृत टीका भाषा टीकाभ्यां विभूषितम्।

एतानि वाऽन्यान्यपि संस्कृतपुस्तकान्युत्तमोत्तमान्यधो लिखितात्स्थानाद्भवन्तः स्वल्पमूल्येन लब्धुं शक्नुवन्ति।

विविध-पुस्तकप्राप्तिस्थानम्—

बाबू हरिकृष्णदास गुप्त

"गुप्त बुकडिपो"

कचौरी गली, बनारस।

2264

